Roll No. ..........................

Total No. of Pages : 8

Total No. of Questions : 28

## पूर्वमध्यमा द्वितीयखण्ड (10वीं) वार्षिक परीक्षा 2025-26

## विषय कोड : 1013

## ज्योतिषम् (गोलपरिभाषा)

समय : 3 घण्टे | पूर्णांक : 100

निर्देशा: —

- सर्वे प्रश्ना: संस्कृतभाषायाम् एव समाधेया:।
- प्रश्नानां समक्षम् अङ्का: प्रदत्ता: सन्ति।
- प्रश्नक्रमाङ्क: **01** त: **05** प्रश्नपर्यन्तं प्रदत्तेषु उपप्रश्नेषु प्रत्येकस्योपप्रश्नस्य कृते **01** अङ्क: निर्धारित: अस्ति।
- प्रश्नक्रमाङ्क: **06** त: **15** पर्यन्तं प्रदत्तेषु अतिलघूत्तरीयप्रश्नेषु प्रत्येकस्य प्रश्नस्य कृते **(02)** अङ्कद्वयं निर्धारितमस्ति। अतिलघूत्तरीय प्रत्येकस्य प्रश्नस्य उत्तरं प्राय: विंशतिशब्देषु दातव्यं भवति।
- प्रश्नक्रमाङ्क: **16** त: **21** प्रश्नपर्यन्तं प्रदत्तेषु लघूत्तरीयप्रश्नेषु प्रत्येकस्य प्रश्नस्य कृते **(03)** अङ्कत्रयं निर्धारितमस्ति। लघूत्तरीय प्रत्येकस्य प्रश्नस्य उत्तरं प्राय: चत्वारिंशत् शब्देषु दातव्यं भवति।
- प्रश्नक्रमाङ्क: **22** त: **26** प्रश्नपर्यन्तं प्रदत्तेषु दीर्घोत्तरीयप्रश्नेषु प्रत्येकस्य प्रश्नस्य **(04)** चत्वार: अङ्का: निर्धारिता: सन्ति। दीर्घोत्तरीय प्रत्येकस्य प्रश्नस्य उत्तरं प्राय: अशीतिशब्देषु दातव्यं भवति।
- प्रश्नक्रमाङ्क: **27** त: **28** प्रश्नपर्यन्तं प्रदत्तेषु विश्लेषणात्मकप्रश्नेषु प्रत्येकस्य प्रश्नस्य कृते **(05)** पंच अङ्का: निर्धारिता: सन्ति। विश्लेषणात्मक प्रत्येकस्य प्रश्नस्य उत्तरं प्राय: विंशत्यधिकैकशतम् शब्देषु दातव्यं भवति।
- लघूत्तरीय–दीर्घोत्तरीय–विश्लेषणात्मकप्रश्नेषु विकल्परूपेण (अथवा रूपेण) प्रश्ना: प्रदत्ता: सन्ति। द्वयो: विकल्पयो: एक एव प्रश्न: समाधेय:।

वस्तुनिष्ठप्रश्नाः —

1. उचितं विकल्पं चित्वा उत्तरं ददत : 7×1=7

(क) स्वव्यासस्योपरि वृत्तार्धस्य समन्ततः भ्रमणेन किं जायते ?

(अ) दिग्वृत्तम् (ब) लघुवृत्तम्

(स) पूर्वोक्तवृत्तद्वयम् (द) गोलः

(ख) यस्य वृत्तस्य धरातलं गोलकेन्द्रं भित्वा गच्छति तत् किं कथ्यते ?

(अ) महद्वृत्तम् (ब) लघुवृत्तम्

(स) कदम्बभ्रमणवृत्तम् (द) एतेषु कोऽपि नास्ति

(ग) प्राचीनमतानुसारं ब्रह्माण्डगोलस्य मध्ये स्थितोऽस्ति ?

(अ) सूर्यः (ब) भूगोलः

(स) चन्द्रः (द) बृहस्पतिः

(घ) नव्यानां विदुषां मतानुसारं ब्रह्माण्डस्य गोलकेन्द्रम् अस्ति ?

(अ) पृथिवी (ब) शुक्रः

(स) दिवाकरः (द) चन्द्रः

(ङ) कस्यापि वृत्तस्य कति पृष्ठीय-केन्द्राणि भवन्ति ?

(अ) द्वे (ब) त्रीणि

(स) चत्वारि (द) एकम्

(च) ध्रुवद्वयगतं खमध्यगतं च वृत्तम् केन नाम्ना अभिधीयते ?

(अ) पूर्वापरवृत्तम् (ब) याम्योत्तरवृत्तम्

(स) क्षितिजवृत्तम् (द) एतेषु किमपि न

(छ) भूपृष्ठे नरो यत्र लम्बाकार: संलग्नो भवति तस्य स्थानस्य नाम किम् ?

(अ) केन्द्रस्थानम् (ब) खस्वस्तिकम्

(स) पृष्ठस्थानम् (द) समस्थानम्

2. अधोलिखितानि रिक्तस्थानानि कोष्ठकात् उचितं विकल्पं चित्वा पूरयत : 7×1=7

(क) समवृत्तं हि पूर्वस्यां यत्र क्षितिजमण्डले स्पृशेत् तदेव गोलज्ञैः .................... उच्यते।

(पूर्वस्वस्तिकम्/पश्चिमस्वस्तिकम्)

(ख) कोणवृत्तं .................... नाम्ना अति ज्ञायते। (समस्थानम्/विदिग्वृत्तम्)

(ग) ध्रुवस्थानान्नवत्यन्शै: .................... वृत्तम् प्रकीर्तितम्। (क्रान्तिवृत्तम्/नाडीवृत्तम्)

(घ) भूपृष्ठस्थध्रुवस्थानान्नवत्यंशैः यद् वृत्तं तदेव जनैः .................... इति कथ्यते।

(विषुवद्रेखा/पश्चिमस्वस्तिकम्)

(ङ) कदम्बस्थानानवत्यंशैः कृतं वृत्तं .................... भवति। (नाडीवृत्तम्/क्रान्तिवृत्तम्)

(च) खे भचक्रम् .................... विभागेषु विभक्तमस्ति। (सप्तविंशतिः/नवविंशतिः)

(छ) नाडीवृत्त-क्रान्तिवृत्तयोः योगविन्दू .................... भवतः। (गोलसन्धी/अयनम्)

3. समुचितं युग्ममेलनं कुरुत : 6×1=6

| | |
|---|---|
| (क) खमध्याद् ग्रहगं वृत्तं भवति। | (1) प्रथमलग्नम्। |
| (ख) दृग्वृत्ते ग्रहात् क्षितिजवृत्तपर्यन्तम् भवन्ति। | (2) षष्टि। |
| (ग) मेषादिराशिषट्कस्थः भास्करः भवति। | (3) चरखण्डम्। |
| (घ) क्रान्तिवृत्तस्य यः प्रदेशः पूर्वक्षितिजे संलग्नो भवति तदुच्यते। | (4) दृग्वृत्तम्। |
| (ङ) अहोरात्रवृत्ते घटिकाः भवन्ति। | (5) उन्नतांशाः। |
| (च) अहोरात्रवृत्ते क्षितिजोन्मण्डलयोर्मध्ये यत् चापखण्डं तत् भवति। | (6) सोम्यगोले भवति। |

4. निम्नलिखितानां सत्यकथनानां समक्षं 'सत्यम्' असत्यकथनानां समक्षं च 'असत्यम्' इति लिखत — 6×1=6

| कथनम् | सत्यम्/असत्यम् |
|---|---|
| (क) बिम्बोपरिगतं कदम्बप्रोतवृत्तं क्रान्तिवृत्ते यत्र लगति तत् स्थानं खमध्यं कथ्यते। | |
| (ख) मेषादिराशीनामाद्यन्तबिन्दुद्वयगतध्रुवप्रोतयोर्मध्ये नाडीवृत्ते मेषादिराशिनाम् उदयासवः भवन्ति। | |
| (ग) पूर्वस्वस्तिक—पश्चिमस्वस्तिकगतं भूकेन्द्रगतं च सूत्रं समसूत्रं कथ्यते। | |
| (घ) समस्थानद्वयगतं भूकेन्द्रगतं च सूत्रं पूर्वापरसूत्रं कथ्यते। | |
| (ङ) ग्रहो यदा याम्योत्तरवृत्ते भवति तदा ग्रहबिम्बात् स्वोदयास्तसूत्रोपरि कृतो लम्बो हृति कथ्यते। | |
| (च) शङ्कूमूलात् समसूत्रे कृतो लम्बो भुजः न कथ्यते। | |

5. निम्नलिखितप्रश्नानाम् उत्तराणि **एक**वाक्येन लिखत : 6×1=6

(क) दर्शान्तासन्नकाले कस्य ग्रहणस्य सम्भावना भवति ?

(ख) ग्राह्य-ग्राहकयोर्यदा पूर्वापरान्तराभावो याम्योत्तरान्तराभावश्च भवति तदा किं जायते ?

(ग) ग्राह्य-ग्राहकयो: प्रथम: योग: किमुच्यते ?

(घ) अभीष्टचापस्यैकप्रान्तं स्पृष्ट्वा निर्गता केन्द्रापरप्रान्तलग्नरेखावधिर्या सरला रेखा सा तच्चापस्य का कथ्यते ?

(ङ) कोणोत्पादकरेखयोरेकस्यामिष्टस्थले बिन्दुं कृत्वा तस्मादपरस्यां कृताल्लम्बाल्लम्बमूलकोणबिन्दु: अन्तरेणाप्तं कस्य स्पर्शरेखा भवति ?

(च) परिष्कृताया: ससुधाराधिकाटीकोपेतागोलपरिभाषाया: रचनाकारस्य नाम किम् ?

**अतिलघूत्तरीयप्रश्ना: —**

6. किं नाम महद्वृत्तम् इति लिखत ? 2

7. समस्थानं परिभाषासहितं वर्णयत ? 2

8. गोल केन्द्रात् पृथक् स्वधरातलमध्यगं कस्य वृत्तस्य केन्द्रं भवति ? 2

9. समस्थानान्नवत्यंशै: निर्मितस्य वृत्तस्य नाम किम् ? 2

10. केषु राशिषु स्थितो सूर्य: दक्षिणायनं भवति ? 2

11. लङ्काक्षितिजे लङ्कोदयासव: कस्मिन् वृत्ते भवन्ति ? 2

12. चन्द्रग्रहणे छादिका का भवति ? 2

13. चन्द्रग्रहणे यदा सकलं चन्द्रबिम्बं हि भूभायां प्रविशति तत् किं कथ्यते ? 2

14. किं नाम कोणस्य कोट्युत्क्रमज्या इति लिखत ? 2

15. कोणस्य या ज्या तस्या: भाज्यहारयो: परिवर्तनेन यत्सम्पद्यते तत्कोणस्य किं भवति ? 2

लघूत्तरीयप्रश्नाः —

16. गर्भीय—पृष्ठीयकेन्द्राणां विवेचनं कुरुत। 3

**अथवा**

खस्वस्तिकं परिभाषापूर्वकं वर्णयत।

17. पाठ्यपुस्तकानुसारं राशिविभागानां वर्णनं कुरुत। 3

**अथवा**

कदम्बवृत्तं क्रान्तिवृत्तं च परिभाषासहितं वर्णयत।

18. दिनार्द्धमानसाधनं कथं क्रियते इति वर्णयत ? 3

**अथवा**

अयनप्रोतवृत्तं परमाक्रान्तिः च कथं ज्ञायते इति स्पष्टयत ?

19. हृतिः, तद्धृतिः, इष्टहृतिश्च इत्येतेषां साधनं कथं क्रियते इति विवेचयत। 3

**अथवा**

अन्त्या परिभाषा सूत्रसहितं वर्णयत।

20. भूभायाः चन्द्रग्रहणस्य च वर्णनं कुरुत। 3

**अथवा**

किं नाम ग्रहणम् इति वर्णनसहितं स्पर्शः मोक्षश्च इत्यनयोः विवेचनं कुरुत ?

21. चापज्या किम् इति परिभाषापूर्वकं वर्णनं कुरुत। 3

**अथवा**

कोणज्या किमिति परिभाषासहितं लिखत ?

दीर्घोत्तरीयप्रश्ना :

22. प्राच्यमतानुसारम् उदाहरणसहितं ग्रहकक्षाक्रमस्य विवेचनं कुरुत। 4

**अथवा**

आधुनिकमतानुसारम् उदाहरणसहितं ग्रहकक्षाक्रमस्य वर्णनं कुरुत।

23. मध्यभूपरिधेः परिभाषासहितं चित्रसहितं च विवेचनं कुरुत। 4

**अथवा**

नाडीवृत्त-विषुवद्रेखा-निरक्षदेशंस्य च विस्तारपूर्वकं विवेचनं कुरुत।

24. स्पष्टभूपरिधिसहितं देशान्तस्य विवेचनं कुरुत। 4

**अथवा**

मेषादि-तुलादि गोलसन्धयोः विस्तारपूर्वकं वर्णनं कुरुत।

25. उत्तरगोल-दक्षिणगोल-विभागम् अयनर्तुकथनं च उदाहरणपूर्वकं विस्तरेण वर्णयत। 4

**अथवा**

दृग्वृत्त-नतांशोन्नतांश-दृग्ज्या-शङ्कु-दिगंश-दिग्ज्यायाः च उदाहरणसहितं वर्णनं कुरुत।

26. चरखण्ड-कुज्या-चरज्यायाः च वर्णनं परिभाषापूर्वकं कुरुत। 4

**अथवा**

स्थान-मध्यविक्षेप-स्पष्टशर-मध्यमक्रान्ति-स्पष्टक्रान्तेः च वर्णनं कुरुत।

**विश्लेषणात्मकप्रश्नाः —**

27. लङ्कोदयपरिभाषासहितं लङ्कोदयासूनां वैभिन्ये कारणं स्पष्टयत। 5

**अथवा**

पूर्वापरादिसूत्रपरिभाषाम् उदाहरणसहितं वर्णयत।

28. पलभावर्णन सहितम् अक्षक्षेत्राणां विस्तृतं वर्णनं कुरुत। 5

**अथवा**

चापीयत्रिभुजं चापजात्यं च विस्तरेण विवेचयत।